तेषामपि जनकत्वसम्भवाच्च । ज्ञानादिसाक्षाज्जन्यत्वस्य निरस्तत्वात् । अथ योगजधर्माजन्यजन्यसविकल्पकाजन्यसामान्यलक्षणाप्रत्यासत्त्यजन्योपादानगोचरापरोक्षज्ञान चिकीर्षाकृतिमज्जन्यमिति साध्यम् यद्वा अनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्यजन्यज्ञानादिमदजन्यं जन्यम् अनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्योपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यमिति साध्यम् ज्ञानाव्यवहितोत्तर समयवर्त्तीच्छाव्यवहितोत्तरक्षणवर्त्ति कृतीनां जनकत्वं विवक्षितं न तु ज्ञानादीनां यौगपद्यं पौर्वापर्य्यं वाऽतो न साध्याप्रसिद्धिर्नवा क्षित्यादौ बाध इति मैवं योगजधर्मसामान्यज्ञानरूपप्रत्यासत्तीनामनागतगोचरसाक्षात्कारस्य च तज्जनकप्रत्यासत्तीनाञ्च परस्याप्रसिद्धतया तदजन्यस्य साक्षात्कारस्याप्यसिद्धत्वेन पक्षसाध्ययोर्विशेषणासिद्ध्या परं प्रत्याश्रयासिद्धेः साध्याप्रसिद्धेः । तत्सिद्धौ वा पक्षे तदजन्यत्वासिद्धिः क्षितिजनकादृष्टजनककृतिचिकीर्षासाक्षात्काराणां योगजधर्माद्यजन्यानामदृष्टद्वारा क्षितिजनकत्वेन सिद्धसाधनात् न च तादृशसाक्षाज्जन्यत्वं विवक्षितं घटादिदृष्टान्ते तदसम्भवात् । दृष्टान्ते घटादौ जनकेष्टसाधनताज्ञानस्यानुमितित्वेन जन्यसविकल्पकव्याप्तिग्रहजन्यत्वेन साध्याप्रसिद्धेश्च । ननु व्याप्तिबलेन साध्यं सिध्यति व्याप्तिश्च यत्र यत्र कार्य्यत्वं तत्र तत्र तदुपादानाभिज्ञकर्त्तृत्वमितिरूपा न तु यद्यत् कार्य्यं तत्तत् किञ्चिदुपादानाभिज्ञजन्यमिति एवञ्च यत्र कार्य्यत्वं तत्र तदुपादानाभिज्ञजन्यत्वमिति विशिष्टव्याप्त्या क्षित्यादौ कार्य्यत्वं क्षित्याद्युपादानाभिज्ञजन्यत्वमेव साधयत्यतो न सिद्धसाधनमितिचेन्न घटे पटे च व्याप्तिग्रहः कार्य्यत्वस्य किं प्रत्येकं घटोपादानाद्यभिज्ञजन्यत्वेन, तत्तदुपादानाभिज्ञजन्यत्वेन, उपादानाभिज्ञजन्यत्वेन वा आद्ये पटोपादानाभिज्ञजन्यत्वादौ कार्य्यत्वस्य व्यभिचार एव । द्वितीयेऽननुगमः । तत्तच्छब्दाभिधेयघटाद्युपादानगतानुगतरूपाभावात् कथं व्यापकताग्रहः । तत्तच्छब्दस्य स्वभावात् समभिव्याहृतपरतया नायं दोष इति चेत् न अनुमाने शब्दस्वभावोपन्यासस्याप्रयोजकत्वात् । अतएवेदानीं देवदत्तोबहिरस्ति विद्यमानत्वे सति गृहासत्त्वात् विद्यमानत्वे सति योयदा यत्र नास्ति स तदा तदतिरिक्तदेशेऽस्ति यथाऽहमेव बहिरसन् गृहे प्रतिष्ठामीत्यत्र पक्षे दृष्टान्तसाधारणयत्तत्त्वयोरनुगतयोरभावान्नान्वयी किन्तु व्यतिरेकीत्युक्तम् । तृतीये सिद्धसाधनमेव । अथ सर्गाद्यकालीनं द्व्यणुकं ज्ञानेच्छाकृतिसमानकालीनसामग्रीजन्यं कार्य्यत्वात् घटवत् । अदृष्टसामग्रीजन्यत्वेऽदृष्टत्वापत्तिरिति चेन्न परं प्रति सर्गाद्यसिद्धेः ज्ञानादीनां सिद्धावपि द्व्यणुकाजनकत्वात् तदानीमसिद्धावप्रयोजकत्वाच्च । एतेन सर्गाद्यकालीनं द्व्यणुकं द्व्यणुकासमवायिकारणसमकालीनकृतिजन्यमिति निरस्तं द्व्यणुकासमवायिकारणसमानकालीनकृतित्वेन गौरवाप्रयोजकाभ्यामजनकत्वात्” साध्याक्षेपः ।

“किञ्च कार्य्यत्वं ? न तावत् योगोपस्थितकृत्यर्हत्वम् असिद्धेः नापि पूर्वकालासत्त्वे सत्युत्तरकालसम्बन्धः, तत्तत्पूर्वकालस्याननुगतत्वात् सकलपूर्वकालस्याप्रसिद्धेः नापि कादाचित्कत्वं प्रागभावप्रतियोगित्वं ध्वंसेनानैकान्तात् । नापि सत्त्वे सति तत्त्वं सत्ताजातेः परं प्रत्यसिद्धेः स्वरूपसत्त्वस्य च ध्वंसेऽपि सत्त्वात् यत्तु अयं घटः एतद्घटजनकानित्यज्ञानचिकीर्षाकृत्यतिरिक्तज्ञानादिजन्यः कार्य्यत्वात् पटवदित्यादि तन्न विपक्षे बाधकाभावेनाप्रयोजकत्वात् अन्यथाऽयं घटः एतद्घटजनकानित्यादृष्टातिरिक्तनित्यादृष्टजन्यः कार्य्यत्वात् अपरघटवत् । एतत्सुखदुःखसाक्षात्कारौ एतज्जनकानित्यसुखदुःखसाध्यौ सुखदुःखसाक्षात्कारत्वादित्यादिना नित्यधर्मसुखदुःखाश्रयस्यापि सिद्धिप्रसङ्गात् । अयं घटः स्वजनकानित्यज्ञानाद्यतिरिक्तनित्यज्ञानाद्यजन्यः अपरघटवदित्यादिना सत्प्रतिपक्षाच्च । केचित्तु दृश्यते तावदभिमतविषयग्राहिणीन्द्रिये मनोनिवेशवतः पुंसो मनःक्रियानुकूलो यत्नः तथा च सर्गाद्यकालीनशरीरजन्य ज्ञानध्वंसानाधारकालाधारज्ञानजनकात्ममनःसंयोगजनिका मनःक्रिया तन्मनोगोचरप्रयत्नानाधारतन्मनोगोचरप्रयत्नतद्व्याप्येतर सकलकारणाधारकालानन्तरकालानाधाराद्य सत्ताका तन्मनःक्रियात्वात् ममतन्मनःक्रियावत् अर्थात् प्रयत्नाधारकालानन्तरकालाधारा सा क्रिया सिद्ध्यतीत्याहुः । तत्र सर्गाद्यकाले ज्ञानेजनकमनःसंयोगजनकक्रियायां मानाभावः पूर्वक्रिययैव संयोगसंभवात् । ईश्वरवादिनां तन्मनोगोचरप्रयत्नाधारकालोऽप्रसिद्धएव क्रियात्वस्यैव हेतुत्वे व्यर्थविशेषणत्वञ्च । किञ्चैवं प्रयत्नानाधारकालानन्तरकालाधारत्वम् अर्थात् तत्सिद्धौ मानान्तरादीश्वरासिद्धावर्थान्तरत्वमिति” हेत्वाक्षेपः ।

“अत्रोच्यते अदृष्टाद्वारकोपादानगोचरजन्यकृत्यजन्यानि समवेतानि जन्यानि, अदृष्टप्रागभावव्याप्यप्रागभावाप्रतियोग्युपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि, स्वजनकादृष्टोत्तरोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि वा अपरोक्षज्ञानचिकीर्षाप्रयत्नविषयीभूतोपादानानि